# सुस्थसमाजनिर्माणे गीतोक्तवर्णाश्रमस्य योगदानम्



**डॉ. प्रदीप कुमार वाग्**

**सहायकाचार्यः, साहित्यविभागः,**

**राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः,**

**सारांशः–** ब्रह्मचर्याश्रमः, गृहस्थाश्रमः, वानप्रस्थाश्रमः तथा सन्यासाश्रमश्च इति भेदेन समाजे चत्वार : वर्णव्यवस्था कल्पिताः। वर्गव्यवस्थायां वर्णानां माहात्म्यं भजते। अतः वर्णव्यवस्थाविषये तथा वर्णाश्रमव्यवस्था विषये च भगवद्गीतायां प्रस्तुताः नैकेविचाराः मया सारल्येन शोधलेखे प्रस्तूयते।

**मुख्य शब्द–** ब्रह्मचर्याश्रमः, गृहस्थाश्रमः, वानप्रस्थाश्रमः, सन्यासः, गीता, समाजः।

**शमानी प्रपा सहवोन्नभाग : समायुक्रे सह वो युनज्मि।सम्यञ्चोग्नि समर्यतारा ताभिमिवामितः** इति अर्थवेदस्य वचनानुसारं समाजस्य आकारं विवृणुते। साधारणतः समाज इति शब्दश्रवणनैव मनसि प्रश्नः समायाति यत् कोऽयं समाजः इति। अतोच्यते मानवानां समूहः समाजः इति। तत्र च सम् + अच+घञ् इति व्याकरणव्युत्पत्या समाज इति शब्दः निष्पद्यते। तत्र समाजे चत्वारवर्णाः दृश्यन्ते। तदुक्तं गीतायाम् -**चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः।** अतः एतेषां वर्णानां कृते तत्र समाजे चत्वार : वर्णव्यवस्था अपि कल्पिताः। यथा ब्रह्मचर्याश्रमः, गृहस्थाश्रमः, वानप्रस्थाश्रमः तथा सन्यासाश्रमश्च । अतः वर्गव्यवस्थायां वर्णानां माहात्म्यं भजते। अतः वर्णव्यवस्थाविषये तथा वर्णाश्रमव्यवस्था विषये च भगवद्गीतायां नैके विचाराः दरीदृश्यते। तदित्थम् -

**का नाम वर्णव्यवस्था -**

वैदिककालादारभ्य भारतेऽस्मिन् वर्णव्यवस्था प्रसरीसर्ति । वर्णशब्देन किम् अभिप्रेतम् इतिजिज्ञासायां वर्णो वृणोतिः (निरुक्त)। मानवः स्वजीवन-निर्वाहार्थं यां कामपि वृत्तिम् आश्रयते, तदनुसारमेव तस्य वर्णनिर्णयः । प्रवृत्ति वैविध्यम् अनुरुध्य मानवशरीर-समालोचनपूर्वकं चातुर्वर्ण्यव्यवस्था प्रवर्तिता।मानवशरीरं चतुर्धा विभक्तुं शक्यते - १. शिरोभागः ज्ञानेन्द्रियमनोबुद्धिसमन्वितः, २. हस्तौ ग्रहणं दानादान-रक्षण-साधनभूतौ, ३. उदरप्रधानो मध्यभागः, पचनक्रियासम्बद्धोऽशितमन्नं रक्तादिरुपेण परिवर्त्य शरीरस्थितिसाधकश्च, ४. पादौं, गमनागमनादिसाधको शरीरस्थितिप्रवत्तिप्रवर्तकौ च।एवमेव राष्ट्र समाजोऽपि चतुर्धा विभज्यते। यथा - १. ब्राह्मणो ज्ञानकार्य-सम्बद्ध2. क्षत्रियो रक्षाकार्यसम्बद्धः, ३. वैश्यः कृषिवाणिज्यादिसम्बद्धः, ४. शूद्रः शुश्रूषाकार्यसम्बद्धश्च। एतदेवाभिप्रेत्या यजुर्वेदे (यजुवेदः, ३१-११)चातुर्वण्यम् उल्लिख्यते -

**ब्राह्मणोऽस्य मुखमासीद् बाहू राजन्यः कृतः।**

**ऊरुः तदस्य यद् वैश्यः पद्भ्यां शूद्रो अजायत।।**

**गीतायां वर्णव्यवस्था** -

श्रीमद्भगवद्गीतायामपि वर्णव्यवस्थाविषये सुविस्तृतरूपेण सुस्पष्टश्च भगवता श्रीकृष्णेनोक्तम्। तेषां वर्णानां विभागीकरणं कर्मणामाधारेणैव भवति। उक्तं यत् चतुर्थोऽध्यायस्य त्रयोदशश्लोके -

**चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः।**

**तस्य कर्तारमपि मां विद्ध्यकर्तारमव्ययम्।।**

तेषां चतुर्णां वर्णानां कर्मभेदविषयेऽपि गीतायां सारल्येन वर्णितमस्ति।

**ब्राह्मणस्य कर्तव्यम् -**

गीतायां मनुस्मृतौ च ब्राह्मणस्य कर्तव्यं निर्दिश्यते यद् अध्ययनम्, अध्यापनम्, यजनम्,याजनम्, दानम्, प्रतिग्रहः, शम-दम-शौच-क्षान्ति-क्षमा-आर्जवादि-गुणयुक्तत्वम्, ज्ञान-विज्ञानयो:समुत्कृष्टत्वं च ब्राह्मणस्य कर्तव्यम्। तदाह गीतायाम् -

**शमो दमस्तपः शौचं क्षान्तिरार्जवमेव च।**

**ज्ञानं विज्ञानमास्तिक्यं ब्रह्मकर्म स्वभावजम्।।**

मनुस्मृतौ यथा

**अध्यापनमध्ययनं यजनं याजनं तथा।**

**दानं प्रतिग्रहश्चैव ब्राह्मणानामकल्पयत्।।**

**क्षत्रियस्य कर्तव्यम् -**

प्रजानां संरक्षणम्, दानम्,यजनम्, अध्ययनम्, विषयेष्वनासक्तिः , शौर्यम्, धैर्यम, दाक्ष्यम, युद्धेऽपलायनम्, दानम्, प्रभुत्वं च क्षत्रियाणां कर्तव्यम् अवधार्यते। तदाह गीतायाम् -

**शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनम्।**

**दानमीश्वरभावश्च क्षात्रं कर्म स्वभावजम्।।**

**मनुस्मृतौ यथा-**

**प्रजानां रक्षणं दानमिज्याऽध्ययनमेव च।**

**विषयेष्वप्रसक्तिश्च क्षत्रियस्य समादिशत्।।**

महाकविना कालिदासेन -**क्षतात् किल त्रायत इत्युदन: क्षत्रस्य शब्दो भुवनेषु रुढः**,(रघुवंशम्, २-५३) इत्यत्र क्षतेः विपदो वा रक्षणं क्षत्रियस्य कर्तव्यमित्यभिधीयते।

**वैश्यस्य कर्तव्यम् -**

वैश्यस्य कर्तव्यं निर्दिश्यते - पशूनां रक्षणम्, दानम्, यजनम्, अध्ययनम्, व्यापार:, वाणिज्यम्, कुसीदवृत्ति: कृषिश्चेति। मनुस्मृतौ यथा-

**पशूनां रक्षणं दानमिज्याऽध्ययनमेव च।**

गीतायां यथा प्रोक्तम्-

**वणिक्पथं कुसीदं च वैश्यस्य कृषिमेव च।।**

**कृषिगौरक्ष्य वाणिज्यं वैश्यकर्म स्वभावजम्।**

**शूद्रस्य कर्तव्यम्** –

शूद्रस्य शिल्पकार्यम्, सर्वेषां वर्णानां च शुश्रूषणं कर्तव्यम् अभिधीयते। मनुस्मृतौ यथा-

**एकमेव तु शुद्रस्य प्रभुः कर्म समादिशत्।**

गीतायां प्रोक्तं यथा-

**सर्वेषामेव वर्णानां शुश्रूषामनसूयया।।**

**परिचर्यात्मकं कर्म शुद्रस्यापि स्वभावजम्।।**

**वर्णव्यवस्थाया: उपयोगिता -**

वर्णव्यवस्था परीक्ष्यते चेद् गीताया वचनमेतत् समर्थयते यत् चातुर्वर्ण्यं गुणकर्मानुसारमेव प्रवृत्तम्। विभाजनस्य कारणं किम् ? क: आधार: इत्यनुयोगे प्रोच्यते यद् मानवेषु केचन नैसर्गिका: सहजाश्च गुणदोषा उपलभ्यन्ते । तन्मूलकमेव प्रवृत्तिवैविध्यम्। प्रवृत्तिभेदाच्च वृत्तिभेदा: । वृत्तिभेदाच्च वर्णभेदः । वर्णभेदाच्च क्रियाभिन्नत्वम्। अतएव गीतायां निगद्यते -

**ब्राह्मणक्षत्रियविशां शुद्राणां च परन्तप।**

**कर्माणि प्रविभक्तानि स्वभावप्रभवैर्गुणैः।।**

**वर्णव्यवस्थायाः वैज्ञानिकत्वम् -**

दार्शनिकदृष्ट्या, मनोवैज्ञानिकदृष्ट्या, वैज्ञानिकदृष्ट्या च समाजः पर्यालोच्यते चेत् तर्हि चतुर्विधाप्रवृत्तिमानवानां संलक्ष्यते। १. सत्त्वप्रधाना, २. सत्त्वरजोमिश्रिता, ३. रजस्तमोमिश्रिता, ४. तम:प्रधाना च। प्रकृते गुणत्रयात्मकत्वात् प्रकृतिविकृतावापि गुणत्रयसमन्वयो निर्विवादः । सत्वं लघु प्रकाशकम् इति (सांख्यकारिका -२३)। एवं ये सत्वगुणोपेता ज्ञानविज्ञानप्रवणा आध्यत्मिकताआस्तिक्यादिगुणसम्बिताश्च ते ब्राह्मणाः । उपष्टम्भकं चलं च रज: (सांख्यकारिका -१३)। रजोगुणे प्रेरकत्वं क्रियाशीलत्वञ्च। अतो ये सत्त्वरजोमिश्रितास्ते क्षत्रियाः। गुरु वरणकमेवनमः (सांख्यकारिका -१३)। तमोगुणे आवरकत्वं क्रियारहित्यं च। एवं ये रजस्तमोमिश्रितास्तेवैश्याः। ये सर्वथा तमः प्रधानास्ते शूद्राः । एवं दार्शनिकदृष्ट्या वर्णव्यवस्तायाः औचित्यं सुव्यवस्थितत्वंचावगम्यते। अतएव गीतायां प्रतिपाद्यते यद् नहि लोके किञ्चिद् वस्तु गुणत्रयव्यपेतम्। सर्वंत्रिगुणात्मकमेव। तच्चाह गीतायां यथा-

**न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः।**
**सत्त्वं प्रकृतिजैर्मुक्तं यदेभिः स्यात्रिभिर्गुणैः।।**

**गुणकर्मानुसारं वर्णव्यवस्था -**

वर्णव्यवस्था परीक्ष्यते चेत् सा गणकर्णानुसारं प्रावर्तत। य: कश्चन तत् कम कुयात्सत वर्णम् आश्रयेत्। स्वकर्मणैव ब्राह्मणो वैश्यत्वं शूद्रत्वं चापद्यत। एवमेव सत्कामप्यनुरुध्य शूद्रोऽपि ब्राह्मणत्वं प्रपेदे। नहि वर्णव्यवस्था जन्मानुसारिणी जन्ममूला च। अतएव मनुना कर्मानुसार वर्षविपर्ययो निर्दिश्यते-

**शूद्रोब्राह्मणतामेति ब्राह्मणश्चेति शूद्रताम्।**
**क्षत्रियाज्जातमेवं तु विद्याद् वैश्यात् तथैव च।।**

मनुना स्फुटं निर्दिश्यते यद् वेदम् अनधीयानो ब्राह्मणः सपरिवारः शूद्रत्वम् आपद्यते।

**योऽनधीत्य द्विजो वेदमन्यत्र कुरुते श्रमम्।**

**स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः।।**

आपस्तम्ब धर्मसूत्रेऽप्येतदेव विशदीक्रियते यद् धर्मचर्यया वर्णोत्कर्ष लभते, अधर्मचर्ययाच वर्णापकर्षम्। यथा प्रोच्यते आपस्तम्बे(१.२)-

**धर्मचर्यया जघन्यो वर्णः पूर्वं पूर्वं वर्णमापद्यते जातिपरिवृत्तौ।**

**अधर्मचर्यया पूर्वो वर्णो जघन्यं जघन्यं वर्णमापद्यते जातिपरिवत्तौ।।**

उपसंहारः

गीतायाः वचनानि समकल्य अयं निष्कर्षः प्रस्तोतुं शक्यं यत् - सुस्थसमाजस्य निर्माणार्थं समाजेस्थितायाः वर्णव्यवस्थायाः प्राधान्यं भजते इति। यतोऽहि वर्णव्यवस्थायां विभिन्नां वर्णानां कृते वर्णव्यवस्थाः भिन्ना भिन्ना भवन्ति। तत्र च वर्णश्रमे तदवर्ण सम्बद्धः नियमाः अपि कल्पिताः वर्तन्ते।अतः सुस्थसमाजनिर्माणे वर्णाश्रमव्यवस्थायाः योगदानं भवेदेव इति।

## सन्दर्भग्रन्थसूची


1. संस्कृतसाहित्येतिहासः, आचार्य रामचन्द्रमिश्र, चौखम्बा- वाराणसी, 1970
2. संस्कृतसाहित्य का इतिहास, वाचस्पति गैरोला, चौखम्बासंस्करणम्, काशी
3. .संस्कृत व्याकरण दर्शन (हिन्दी), रामसुरेशत्रइपाठी, राजकमल प्रकाशन दिल्ली,1972
4. .संस्कृत शास्त्र का इतिहास, बलदेव उपाध्याय, शारदा मंदिर, वाराणसी, 1969
5. मनुस्मृतिः, मोतीलाल बनारसीदास-दिल्ली,1983
6. गीतारहस्यम्, लोकमान्यवापगङ्गाधरतिलक्, अर्चना पाब्लिकेशन्,
7. श्रीमद्भागवतकथा, आचार्य श्री राममूर्तिशास्त्री पौराणिक,  मोतिलाल् वनासरी दास दिल्ली